दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लपञ्चमी
बैशाख 08 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-179 | 1 | अप्रैल 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रपतेः प्रवासं लक्षीकृत्य प्रत्येकस्मिन् स्थाने भविष्यति आरक्षकनिरीक्षणम्, ३० दिनाङ्के शिमलाम् आगमिष्यति, षट्सु क्षेत्रेषु विभक्तं भविष्यति शिमला-नगरम्

3 महर्षि महेश योगी वैदिक विश्वविद्यालयेन अक्षय तृतीया महोत्सवः सहस्रशीर्ष पुरुषमण्डलस्य स्थपनादिवसश्च समाचरितः

5 डॉ. मोहन भागवतः 'प्रणव' इति संस्कृतभारत्याः नूतनकार्यालयस्य उद्घाटनं कृतवान्; अवदत् च - "संस्कृतं सर्वेभ्यः आगन्तव्यम्, एषा संस्कारं प्रदाति"

## जम्मू-कश्मीरस्य उधमपुर-मण्डले बस-यान-दुर्घटनायां न्यूनातिन्यूनं एकविंशति-जनाः मृताः,

### राष्ट्रपतिः द्रौपदीमुर्मुवर्या प्रधानमन्त्री नरेन्द्रमोदी च अस्यां दुर्घटनायां शोकं प्रकटितवन्तौ

जम्मू-कश्मीरस्य उधमपुर-मण्डले बस-यान-दुर्घटनायां न्यूनातिन्यूनं एकविंशति-जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्। रामनगर-उधमपुर-मार्गे जल्लो-ग्रामं निकषा एषा दुर्घटना अभवत् इति अधिकारिणः अवदन्। राष्ट्रपतिः द्रौपदीमुर्मुवर्या प्रधानमन्त्री नरेन्द्रमोदी च अस्यां दुर्घटनायां शोकं प्रकटितवन्तौ। सामाजिकसञ्जालीयसंदेशे अपि तौ व्रणितानां शीघ्रस्वास्थ्यलाभाय प्रार्थितवन्तौ प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रधानमन्त्री-साहाय्योद्धारकोषात् मृतकेभ्यः द्विलक्षरुप्यकाणां वर्णितेभ्यः त पञ्चाशत्सहस्ररूप्यकाणां साहाय्यराशिः उद्धष्टा । जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हः घटनायाः विषये दुःखम् प्रकटितवान्। सामाजिक-माध्यमे, श्री सिन्हा-वर्यः मृतानां परिवारान् प्रति गभीरं शोकं प्रकटितवान् तथा च व्रणिताः शीघ्रं स्वस्थाः भवेयुः इति प्रार्थयत्।



सिन्हा अवदत् यत् सः जनपद-प्रशासनं, आरक्षकाः, राज्य-विपद्-प्रतिक्रिया-बलम्, स्वास्थ्य-विभागम् इत्येतान् प्रभावितजनान् सर्वान् सम्भवान् साहाय्यं दातुं निर्देशं दत्तवान् इति। प्रधानमन्त्रीकार्यालयस्य केन्द्रीय राज्यमन्त्री तथा कठुआ उधमपुरतः लोकसभायाः सदस्यः जितेन्द्रसिंहः अवदत् यत् तत्क्षणमेव उद्धारकार्यस्य आरम्भः कृतः, जनानां कृते सर्वं सम्भवं साहाय्यं प्रदत्तम् अस्ति ।

## आधार-सत्यापन-क्षेत्रे UIDAI-संस्थायाः महती उपलब्धिः; शत-संस्थानानि OVSE प्रणालीतः सम्बद्धानि




भारतीय-विशिष्ट-पहचान-प्राधिकरण (UIDAI) इत्यनेन एका विशिष्टा उपलब्धिः अधिगता अस्ति । अस्य प्रारम्भानन्तरं मासत्रयाभ्यन्तरम् एव शत-संस्थानानि (OVSE) इति सत्यापन-सौविध्यम् अधिगन्तुं स्वकीयं पञ्जीकरणं कृतवन्ती। अनेन सुरक्षितं, सहमत्याधारितं कर्गद-रहितं च आधार इत्यस्य सत्यापनं वर्धिष्यते। इलेक्ट्रॉनिक्स्-सूचना प्रौद्योगिकी मंत्रालयः प्रावोचत् यत् एतेषु संस्थानेषु सर्वकारीयाः विभागाः, फिनटेक-संस्थानानि, शिक्षा क्षेत्राणि अन्यानि च विविधानि संस्थानानि सम्मिलितानि सन्ति

## भारत-साउथकोरियादेशौ परस्परसहयोगं सुदृढीकृतवन्तौ प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिः ली.जे.म्योंग च परस्परं सन्धिपत्राणि हस्ताक्षरितवन्तौ



भारत-दक्षिणकोरिया-देशौ क्रीडायाः, सांस्कृतिक-सृजनात्मक-उद्योगाणां, एम्. एस्. एम्. ई. इत्येतेषां, औद्योगिक-सहकार समित्याः स्थापनार्थं च चतुर्ष सन्धिपत्रेषु हस्ताक्षरं कृतवन्तौ। नवदेहल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणकोरिया-देशस्य राष्ट्रपतिना ली-जे-मयुङ्ग इत्यनेन सह वार्तानन्तरं एतानि सन्धिपत्राणि अन्तिमरूपं प्राप्तानि । भारत-कोरिया-डिजिटल्-ब्रिड्ज् इत्यस्य उद्घाटनेन सह सी. ई. पी. ए. व्यापार-सन्धेः उन्नतिकरणाय संयुक्तघोषणा अपि प्रावर्तिता। प्रधानमन्त्री मोदी अवदत् यत् एतत् सहभागित्वं ए.आई., सेमिकण्डक्टर्स, तान्त्रिकक्षेत्रेषु गहनसहयोगेन सह शान्तिं स्थिरतां च प्रवर्धयिष्यति। उभयदेशयोः द्विपक्षीयं व्यापारं त्रिंशदुत्तर-द्विसहस्रतमाब्दं यावत् सप्तविंशति-डालर-विलियन्-मिततः पञ्चाशत्-बिलियन्-डालर्-पर्यन्तं वर्धयितुं लक्ष्यम् अस्ति। राष्ट्रपतिः ली-वर्यः भारतं ग्लोबल्-साउथ इत्यस्य नेता इति वर्णितवान् तथा च रक्षायां, ए.आई. इत्यस्मिन्, नौकानिर्माणे च सहयोगं प्राथयत्। उभौ नेतारौ मध्यपूर्वदेशे शान्तेः महत्त्वम् अपि अधोरेखितवन्तः ।

## प्रधानमंत्री नरेंद्रमोदी अद्य राजस्थानस्य बालोतरास्थे पचपदराक्षेत्रे देशस्य प्रथमं 'ग्रीनफील्ड इंटीग्रेटेड रिफाइनरी-सह-पेट्रोकेमिकल कॉम्प्लेक्स' इत्येतत् राष्ट्राय समर्पयिष्यति

प्रधानमंत्री नरेंद्रमोदी अद्य राजस्थानस्य बालोतरास्थे पचपदराक्षेत्रे देशस्य प्रथमं 'ग्रीनफील्ड इंटीग्रेटेड रिफाइनरी-सह-पेट्रोकेमिकल कॉम्प्लेक्स' इत्येतत् राष्ट्राय समर्पयिष्यति। नव-मिलियन-मीट्रिक-टन-प्रति-वर्षस्य क्षमतायाः अस्य रिफाइनरी-सह-पेट्रोकेमिकल कॉम्प्लेक्स इत्यस्य स्थापना नवसप्तति-कोटिरूप्यकाणां निवेशेन कृता अस्ति। अनया परियोजनया देशस्य ऊर्जा-सुरक्षां सुदृढं कर्तुं, पेट्रोकेमिकल-क्षेत्रे आत्मनिर्भरतां वर्धयितुं औद्योगिक-विकासं च वर्धयितुं गतिः प्रदास्यते इत्याशा वर्तते। अनया आजीविकायाः विविधानि साधनानि अपि समुत्पस्यन्ति येन सामाजिकार्थिकक्षेत्रेषु अपि विकासाय योगदानं प्रदास्यते । अस्मिन् अवसरे प्रधानमंत्री नरेन्द्रमोदी एकां जनसभाम् अपि सम्बोधयिष्यति।

## "राष्ट्रपतिः द्रौपदी मुर्मुः वर्यायाः शिमला यात्रा

"राष्ट्रपतिः द्रौपदी मुर्मुः अप्रैल-मासस्य २७ दिनाङ्कतः मई-मासस्य २ दिनाङ्कपर्यन्तं शिमलायाः यात्रायां भविष्यति। अस्मिन् काले राष्ट्रपतिः शिमलायां स्थिते स्वकीये आधिकारिक-आवासे 'द रिट्रीट' इत्यस्मिन् विस्रमिष्यति। शिमलायाः जनपद-न्यायाधीशः (जिला मजिस्ट्रेट) अनुपम कश्यपः यात्रायाः सज्जानां समीक्षायाः कृते आयोजितायाः गोष्ठ्याः अध्यक्षतां कुर्वन् सम्बद्धविभागानाम् अधिकारिणः निर्धारित-समयावधौ सर्वाः सज्जाः पूर्णं कर्तुं निर्दिष्टवान्।

## सुभाषितम्

**निष्णातोऽपि च वेदान्ते,**
**वैराग्यं नैति दुर्जनः।**
**चिरं जलनिधौ मग्नो,**
**मैनाक इव मार्दवम्।।**


भावार्थः- दुष्ट व्यक्ति चाहे वेदों के ज्ञान में पारंगत भी हों फिर भी वह वैराग्य की भावना से उसी प्रकार दूर रह जाता है जिस प्रकार चिरकाल से समुद्र से घिरा हुआ मैनाक पर्वत समुद्र के जल से सदैव अप्रभावित ही रहता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केताः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## जापान-भूकम्पः- जापानस्य उत्तर-तटात् सुदूरं, सानरिक इत्येत् क्षेत्रं निकषा सप्त-दशमलव-चत्वारि-परिमितस्य तीव्रवेगस्य भूकम्पः



जापानस्य उत्तर-तटात् सुदूरं, सानरिक इत्येत् क्षेत्रं निकषा सायं त्रिपञ्चाशत्यधिक-चतुर्वादने सप्त-दशमलव-चत्वारि-परिमितस्य तीव्रवेगस्य भूकम्पः जातः यस्यानन्तरं जापानस्य ऋतुविज्ञानविभागेन सुनामी इत्यस्य सञ्चेतना प्रवर्तिता। एषः भूकंपः न्यूनातिन्यूनं दशकिलोमीटर-परिमितस्य गहनक्षेत्रे प्रावर्तत्। अपरत्र इवाते इति प्रान्तस्य कुजी-तटवर्ति-क्षेत्रे न्यूनातिन्यूनं द्वि-दशमलव-षट्-फीट-परिमितस्य उच्च-सुनामी-तरङ्गाः समङ्किताः अभवन् ।

# पश्चिमबंगाल- तमिलनाडु-राज्ययोः विधानसभा-निर्वाचनाय प्रचाराभियानं तीव्रतरम् अभवत्




विभिन्न-राजनीतिक दलानां वरिष्ठनेतारः मतदानपूर्वं अन्तिमेषु दिनेषु जनसभानां जनयात्राणां च एकां शृंखलां आयोजयन्ति । भाजपेति दलस्य नेता केंद्रीयमंत्री च जे. पी. नड्डा इत्येषः बांकुरा-जनपदस्य कोतुलपुरक्षेत्रे एकां जनसभां कुर्वन्ति । दलस्य नेता राजनाथ-सिंहः बीरभूमक्षेत्रे एकां निर्वाचनजनसभां सम्बोधितवान् अपरत्र भाजपादलस्य राष्ट्रियाध्यक्षः नितिन-नबीनः इत्यनेन पूर्वी-मिदनापुर-क्षेत्रे एका जनयात्रा कृता । तृणमूल कांग्रेस इति दलस्य नेता अभिषेक-बनर्जी इत्यसौ बांकुराजनपदस्य रानीबांधक्षेत्रे एकां जनसभा संबोधयति । तमिलनाडुराज्ये, तेलुगु देशम पार्टीति दलस्य नेता आंध्रप्रदेशस्य मुख्यमंत्री च चंद्रबाबूनायडू इत्यसौ केन्द्रीय-नागरिक उड्डयन मंत्री टी.डी.पी इति दलस्य नेता किंजरापु-राममोहन-नायडू इत्यनेन सह सम्मिल्य कोयंबटूरजनपदे एन.डी.ए. इति ग्रन्थिबन्धनाय प्रचारम् अकरोत् । कांग्रेसदलस्य नेता राहुलगांधी राज्ये अनेकेषु क्षेत्रेषु निर्वाचनसभाः समबोधयत् । टी.वी.के. इत्यस्य अध्यक्षः अभिनेता च विजयः इत्यनेन पोन्नेरी-विधानसभा क्षेत्रस्य पंचट्टीक्षेत्रे प्रचारः कृतः ।

# राष्ट्रपतेः प्रवासं लक्षीकृत्य प्रत्येकस्मिन् स्थाने भविष्यति आरक्षकनिरीक्षणम्, ३० दिनाङ्के शिमलाम् आगमिष्यति, षट्सु क्षेत्रेषु विभक्तं भविष्यति शिमला-नगरम्



**हिमसंस्कृतवार्ताः - शिमला।**
भारतस्य राष्ट्रपतेः द्रौपदी-मुर्मु-वर्यायाः शिमला-प्रवासं अधिकृत्य आरक्षक-प्रशासनेन सज्जीकरणं प्रारब्धम्। राष्ट्रपतेः प्रवासकाले राजधान्यां शिमलायां प्रत्येकस्मिन् स्थाने आरक्षकदलस्य तीक्ष्णदृष्टिः भविष्यति। अस्य प्रवासस्य निमित्तं शिमलायां प्रायः १५०० आरक्षकाः नियुक्ताः भविष्यन्ति। एतदतिरिच्य, शिमला-नगरं षट्सु पृथक्-पृथक् क्षेत्रेषु (Sectors) विभक्तं भविष्यति। विशिष्टजन-आवागमनकाले (VIP Movement) सामान्यजनेभ्यः कष्टं न भवेत्, एतदर्थं शिमला-आरक्षकदलेन 'यातायात-योजना' सज्जीक्रियते। राष्ट्रपतिः द्रौपदी मुर्मू ३० अप्रैल दिनाङ्के 'आरट्रैक' (ARTRAC) इत्यस्य कार्यक्रमे भागं ग्रहीष्यति। सा २७ अप्रैलतः २ मई दिनाङ्कपर्यन्तं शिमलायां स्थातुं शक्नोति। देहली-स्थित-राष्ट्रपतिभवनात् अनिश्चितः (Tentative) कार्यक्रमः प्राप्तः अस्ति, तदनुसारमेव राज्यसर्वकारः सिद्धतासु सल्लग्नः जातः। डी.आई.जी. (DIG) अञ्जुम आरा महोदया आरक्षकाधिकारिभिः सह प्रवासस्य सज्जीकरणस्य निरीक्षणं कृतवती। अपरपक्षे, जनपद-प्रशासनेन सम्बद्ध-विभागेभ्यः सिद्धता-विषये निर्देशाः दत्ताः। राष्ट्रपतिः शिमला-प्रवासकाले मशोबरा-स्थित-राष्ट्रपतिभवने 'द रिट्रीट' (The Retreat) मध्ये निवत्स्यति।

## ऐतिहासिकी परम्परा

देशस्य राष्ट्रपतेः प्रतिवर्षं ग्रीष्मकाले शिमला-प्रवासः न केवलं औपचारिकी यात्रा, अपितु एकस्याः ऐतिहासिक्याः परम्परायाः निर्वहणमपि अस्ति। अस्याः परम्परायाः मूलानि आङ्गलकालेन (British period) सह सम्बद्धानि सन्ति, यदा शिमला-नगरं भारतस्य ग्रीष्मकालीन-राजधानीरूपेण निर्मितम् आसीत् तथा च सम्पूर्णं प्रशासनं ग्रीष्मकाले अत्रैव स्थानान्तरितं भवति स्म। अद्यापि अस्याः विरासतस्य आंशिकरूपेण पालनं कुर्वन् राष्ट्रपतिः शिमला-स्थित-स्वकीय-आधिकारिक-आवासे 'द रिट्रीट' मध्ये कतिपय-दिनानां प्रवासाय आगच्छति। प्रवासकाले राष्ट्रपतिः विविधासु प्रशासनिक-औपचारिक-प्रवृत्तिषु भागं गृह्णाति। अस्मिन् राज्यसर्वकारेण सह गोष्ठ्यः, विकासयोजनानां समीक्षा, तथा च कदाचित् विश्वविद्यालयानां दीक्षान्तसमारोहेषु अन्येषु सार्वजनिककार्यक्रमेषु च सहभागिता सम्मिलिता भवति।

## इत्थं भविष्यति समयसारिणी

अनिश्चित-समयसारिण्याः अनुसारं राष्ट्रपतिः २७ अप्रैल दिनाङ्के देहलीतः चण्डीगढ़-मार्गेण शिमलां प्राप्स्यति। २८ अप्रैल दिनाङ्के सा एकस्मिन् उद्घाटनसमारोहे सम्मिलिता भविष्यति, २९ अप्रैल दिनाङ्के रोहताङ्ग-स्थितं 'अटल-कन्दरां' गत्वा बी.आर.ओ. (BRO) अधिकारिभिः सह वार्तां करिष्यति, ३० अप्रैल दिनाङ्के पालमपुर-कृषि-विश्वविद्यालयस्य दीक्षान्तसमारोहे भागं ग्रहीष्यति, १ मई दिनाङ्के शिमलायां 'ऐट होम' (At Home) कार्यक्रमः भविष्यति तथा च २ मई दिनाङ्के राष्ट्रपतिः देहलीं प्रतिगमिष्यति।

# सम्पूर्ण देशे LPG इत्यस्य उपलब्धता स्थिरा वर्तते-केन्द्रसर्वकारः



सर्वकारः प्रोक्तवान् यत् सम्पूर्ण देशे LPG इत्यस्य उपलब्धता स्थिरा वर्तते सहैव पश्चिमेशिया-क्षेत्रेषु प्रवर्तमानेन सङ्कटेन समुत्पन्नानाम् अवरोधानाम् अनन्तरम् अपि, वितरकाणां पार्श्वे LPG इत्यस्य अनुपलब्धतायाः कीदृशी अपि सूचना न प्राप्ता। नवदिल्ल्यां एकं संबोधयन्ती, जीवाश्मतैल-प्राकृतिक-वात्येधनमंत्रालयस्य सचिवा, सुजाताशर्मा अकथयत् यत् सर्वकारः प्रभावि-प्रबंधनाय अनेकान् महत्वपूर्णपदक्षेपान् समुत्थापयति यथा-गृहोपभोक्तृणां कृते LPG इत्यस्य उत्पादनवर्धनं, नगरेषु ग्रामीणक्षेत्रेषु च अस्य उपलब्धतायाः वर्धितावधिः, LPG इत्यस्य दुरूपयोगं निराकर्तुं 'डिलीवरी ऑथेंटिकेशन कोड' इत्यस्य प्रावर्तनं चेत्यादयः पदक्षेपाः सम्मिलिताः सन्ति ।

# तमिलनाडुराज्ये सामाजिक-माध्यमानां, विद्युन्मान-सम्प्रेषणस्य, सार्वजनिक-नाट्य-प्रदर्शनानां च माध्यमेन निर्वाचनसम्बद्ध-विषयवस्तूनां प्रदर्शने प्रतिबन्धः



तमिलनाडुराज्ये मुख्य निर्वाचनाधिकारी अर्चनापटनायकः इत्येषा श्वः सायङ्कालात् निर्वाचनसमाप्तिपर्यन्तं प्रभाविनः नव-नियमान् घोषितवती, येषु सामाजिक-माध्यमानां, विद्युन्मान-सम्प्रेषणस्य, सार्वजनिक-नाट्य-प्रदर्शनानां च माध्यमेन निर्वाचनसम्बद्ध-विषयवस्तूनां प्रदर्शने प्रतिबन्धः अपि अन्तर्भवति। बहिःक्षेत्राणां राजनैतिकनेतृभिः पक्षकार्यकर्तृभिः च श्वः सायं षड्वादने निर्गन्तव्यं, ततः परं स्टार-प्रचारकेभ्यः अनुमतिः अपि निषिद्धा भविष्यन्ति। मतदानदिने प्रत्याशिनः केवलं एकं वाहनं, निर्वाचन-प्रतिनिधेः कार्यकर्तृणां च एकं वाहनं च अनुमन्यते, यत्र रिटर्निङ्ग-अधिकारिः इत्यनेन अनुमतिः प्रदास्यते। मतदातृणां परिवहनार्थं वाहनानाम् उपयोगाय कः अपि प्रत्याशिः तस्य प्रतिनिधिः वा न अनुमन्यते ।

# निर्वाचनायोगेन मतदानसम्बद्धेषु राज्येषु मतदानसमाप्तिपर्यन्तं अष्टचत्वारिंशत् होरासु मद्यविक्रये प्रतिबन्धः निर्धारितः अस्ति

निर्वाचन आयोगेन कस्मिन् अपि निर्वाचनक्षेत्रे मतदानसमाप्तिपर्यन्तं अष्टचत्वारिंशत् होरासु मद्यविक्रये प्रतिबन्धः निर्धारितः अस्ति, यस्मिन् उक्तम् अस्ति यत् अस्मिन् काले, भोजनालयेषु, आपणेषु, अथवा कस्मिन् अपि सार्वजनिक-निज-स्थानेषु मद्यस्य विक्रयणं, वितरणं वा न भविष्यति। आयोगेन मई-मासस्य चतुर्दिनाङ्के गणनादिवसे अपि मतदानसम्बद्धेषु राज्येषु केन्द्रशासितप्रदेशेषु च शुष्कदिवसः इति घोषितः अस्ति, तथा च व्यक्तिद्वारा मद्यसञ्चयस्य प्रतिबन्धः भविष्यति । एतदतिरिक्तम् अनुज्ञापत्ररहित-परिसरेषु उत्पादशुल्क-नियमाः च कठोरतया प्रवर्तिताः भविष्यन्ति ।

# एकेन डिजिटल-मञ्चेन सह सम्बद्धाः १९.२५ लक्षपरिवाराः, ७५.९२ लक्षजनाः, 'हिम-परिवार' कार्यक्रमेण प्रदत्ता तथ्य-आधारित-सुशासनाय नवीना दिशा



**हिमसंस्कृतवार्ताः - शिमला।**
डिजिटल-युगे यत्र सुशासनस्य आधारः विश्वसनीयं एकीकृतं च तथ्यजालं (data) भवति, तत्र हिमाचलप्रदेशः 'हिम-परिवार' इति अभिनव-आरम्भ-माध्यमेन नूतनम् आदर्शं स्थापितवान्। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य नेतृत्वे राज्यसर्वकारेण आरब्धा एषा महत्त्वाकांक्षिणी योजना पारम्परिक-विकीर्ण-सेवाप्रणाल्याः स्थाने एकीकृत-तथ्य-आधारित-शासन-प्रतिरूपं (model) प्रति महत्त्वपूर्णं पदम् अस्ति।
वित्तीयवर्षस्य २०२३-२४ आयव्ययक-पत्रके (Budget) घोषितायाः 'हिम-परिवार' योजनायाः उद्देश्यं राज्यस्य प्रत्येकं परिवारं नागरिकं च, तेषां सामाजिक-आर्थिक-सूचनाभिः सह एकस्मिन् एव मञ्चे आनयनम् आसीत्। अद्य एषः आरम्भः एका सुदृढा राज्य-सामाजिक-पञ्जीकरण-प्रणाली (Social Registry) रूपेण विकसिता अस्ति, यस्यां १९,२५,२५८ परिवाराः तथा ७५,९२,६९७ सदस्याः सम्मिलिताः सन्ति। एतद् न केवलं प्रशासनिक-दक्षतां दर्शयति, अपितु सटीक-प्रमाणित-तथ्यानां आधारेण नीतिनिर्माणस्य दिशि एकं बृहत् परिवर्तनमपि अस्ति। अस्याः व्यवस्थायाः केन्द्रे 'हिम-एक्सेस्' (Him Access) एकल-प्रवेश-प्रणाली (Single Sign-On - SSO) वर्तते, यया नागरिकाणां सर्वकारीय-कर्मचारिणां च कृते सेवानां सुलभता एकीकृता च जाता। अधुना एकेन एव उपयोक्तृ-परिचयेन (ID) कूटशब्देन (Password) च विविधानां सर्वकारीय-सेवानां लाभः प्राप्तुं शक्यते।सम्प्रति ७.२ लक्षाधिकाः उपयोक्तारः प्रायः ४६,००० सर्वकारीय-कर्मचारिणश्च अस्याः प्रणाल्याः सदस्याः सन्ति। 'हिम-परिवार' योजनान्तर्गतं प्रत्येकस्मै परिवाराय सदस्येभ्यश्च एका विशिष्टा परिचय-सङ्ख्या (Unique ID) प्रदत्ता अस्ति। अस्याः योजनायाः प्रमुखा विशेषता अस्य सुदृढं तथ्य-सत्यापनं एकीकरण-तन्त्रं च वर्तते। चलभाष-आधारित-सर्वेक्षणैः (Mobile based surveys) वास्तविक-समय-सत्यापनेन च तथ्यानि निरन्तरं परिष्क्रियन्ते (Update)। सामाजिक-सुरक्षा-निवृत्तिवेतन-योजनासु ३९,६९७ मृतानां, ५,५९५ अपात्राणां तथा ६०० अनुपलब्ध-हितधारिणां परिचयं कृत्वा अपात्र-लाभाः रोधिताः, येन राज्यस्य प्रतिमासं पञ्चकोटिरूप्यकाणां रक्षा भवति। अपि च १,०७,०७१ लम्बितानां प्रकरणानां सत्यापनं प्रचलति।

### पारदर्शिनी भविष्योन्मुखी च शासनव्यवस्था

राज्यसर्वकारेण निरन्तर-सर्वेक्षणैः, विभागीय-दत्तांशैः (Databases) डिजिटल-मञ्चैश्च तथ्यानां नियमितं परिष्करणं सुनिश्चितं क्रियते, येन राज्य-सामाजिक-पञ्जीकरण-प्रणाली सदैव गतिशीला प्रासङ्गिकी च तिष्ठति। मुख्यमन्त्रिणः सुक्खुमहोदयस्य नेतृत्वे एषः आरम्भः स्पष्टयति यत् तथ्यानि केवलं सूचनायाः साधनं न, अपितु पारदर्शितायाः, दक्षतायाः समावेशी-विकासस्य च आधारः सन्ति। एकेन एव डिजिटल-मञ्चेन लक्षशः नागरिकान् संयोज्य राज्यसर्वकारेण न केवलं प्रशासनं सरलीकृतं, अपितु उत्तरदायिनीं, पारदर्शिनीं, भविष्योन्मुखीं च शासनव्यवस्थां प्रति महत्त्वपूर्णं पदं स्थापितम्।

### प्रदेशे नगरीय-परिवाराणां तथ्यानां एकीकरणम्

विविध-विभागानां मध्ये समन्वयेन एषः आरम्भः अधिकः सुदृढः जातः। २३,९१,५३६ गृह-विद्युत्-संयोजनानां (Electricity connections), १४,७७,०९८ भू-अभिलेखानां तथा २,११,६९८ नगरीय-परिवाराणां तथ्यानां एकीकरणं कृत्वा एकं व्यापकं तथ्यजालं (Database) सज्जीकृतम्। एतदतिरिच्य, निर्माण-श्रमिकाणां अन्य-वर्गाणां च सर्वेक्षणेन योजनानां व्याप्तिः अधिका समावेशिनी कृता। 'हिम-परिवार' योजना नागरिक-पञ्जीकरण-प्रणाल्या (Digital CRS) तथा भारतसर्वकारस्य 'माई-स्कीम' (MyScheme) इति द्वारकेण (Portal) सह अपि योजिता अस्ति।

# काङ्ग्ड़ाम् आगमिष्यतः केन्द्रीय-स्वास्थ्य-जलशक्तिमन्त्रिणौ

हिमसंस्कृतवार्ताः - धर्मशाला।
मई-मासे केन्द्रीय-स्वास्थ्यमन्त्री जे.पी. नड्डा तथा जलशक्तिमन्त्री सी.आर. पाटिलः च शीघ्रमेव हिमाचलप्रदेशस्य काङ्गड़ा-मण्डलस्य च प्रवासं करिष्यतः। तयोः काङ्गड़ा-मण्डलस्य धर्मशालायां चम्बायां च महत्त्वपूर्णाः गोष्ठ्यः आयोजयिष्यन्ते। एतासु गोष्ठीषु काङ्गड़ा-चम्बा क्षेत्रयोः प्रचलमानानां पेयजल-योजनानां, सेचन-मलवाह-कार्याणां (Irrigation & Sewerage) समीक्षां कृत्वा तेषां शीघ्रपूर्णतायै तथा च नूतन-प्रस्तावानां विषये मन्थनं कृत्वा तेषाम् कार्यान्वयन-गतये बलं प्रदास्यते। तत्रैव, प्रदेशे, काङ्गड़ा-मण्डले तथा टाण्डा-चिकित्सा-महाविद्यालये (Tanda Medical College) स्वास्थ्य-क्षेत्रे विकासाय मुख्यमन्त्रिणं केन्द्रीय-स्वास्थ्यमन्त्रिणं च मण्डले विशेषरूपेण आहूय योजनाः निर्मास्यन्ते।
काङ्गड़ा-संसदीयक्षेत्रस्य सांसदः डा. राजीव भारद्वाजः केन्द्रीयमन्त्रिणः समक्षं प्रस्तावं प्रस्थापितवान्, स्वास्थ्यविभागेन, काङ्गड़ा-क्षेत्रस्य विधायकैः तथा टाण्डा-चिकित्सा-महाविद्यालय-प्रबन्धनेन च सह मिलित्वा मुख्यमन्त्रिणा सह चर्चामार्गेण शीघ्रमेव कार्यक्रमस्य निश्चितीकरणाय योजना निर्मिता अस्ति। काङ्गड़ा-चम्बा क्षेत्रस्य सांसदः डा. राजीव भारद्वाजः अवदत् यत् अस्मिन् विषये मुख्यमन्त्रिणा सह मिलित्वा योजनां निर्माय कार्यं करिष्यते।

# एच्.पी.टी.यू. हमीरपुरः अभ्यर्थिनां कृते शमनम्, आवेदनस्य अन्तिमतिथिः २२ अप्रैल पर्यन्तं वर्धिता




**हिमसंस्कृतवार्ताः शिमला** ।हिमाचल-प्रदेश-तकनीकी-विश्वविद्यालयः (हमीरपुर) इत्यस्य प्रवेशपरीक्षायाः कृते अन्तर्जाल-माध्यमेन आवेदनं कर्तुं अन्तिमतिथिः विस्तारिता अस्ति। अधुना अभ्यर्थिनः २२ अप्रैल दिनाङ्कपर्यन्तं आवेदनं कर्तुं शक्नुवन्ति। पूर्वम् एषा तिथिः १९ अप्रैल आसीत्।अद्यावधिं प्रवेशपरीक्षायाः कृते ७,५०० तः अधिकाः अभ्यर्थिनः आवेदनं कृतवन्तः। यस्मिन् बी.टेक कृते ४,२०० तथा बी.भेषजी (B.Pharmacy) कृते प्रायः २,४०० अभ्यर्थिनां आवेदनानि प्राप्तानि। एतदतिरिच्य अन्यविषयाणाम् अपि आवेदनानि समागतानि।

**परीक्षायाः समयसारणी**

तकनीकी-विश्वविद्यालयस्य प्रवेशपरीक्षा ९ तथा १० मई दिनाङ्कयोः आयोजयिष्यते। शैक्षणिक-अधिष्ठाता डॉ. राजेश कुमार शर्मा उक्तवान् यत् अस्मिन् वर्षे 'सामान्य प्रवेश परीक्षा' (CET) ९ तथा १० मई दिनाङ्के भविष्यति।

- ९ मई (प्रातः सत्रम्): प्रातः ९:०० तः ११:०० वादनपर्यन्तं बी.एस्.सी. एच्.एम्. एण्ड सी.टी. (BSc HM & CT/BHMCT) तथा एम्.एस्.सी. पर्यावरण-विज्ञानस्य परीक्षा भविष्यति।
- १० मई (प्रातः सत्रम्): प्रातः ९:०० तः ११:०० वादनपर्यन्तं एम्.एस्.सी. भौतिक-विज्ञानस्य परीक्षा, तथा ९:०० तः १२:१५ वादनपर्यन्तं बी.टेक एवं बी.भेषजी इत्यनयोः परीक्षा भविष्यति।
- १० मई (सायं सत्रम्): अपराह्णे २:०० तः ४:०० वादनपर्यन्तं एम्.सी.ए. (MCA), एम्.बी.ए. (MBA) तथा एम्.बी.ए. पर्यटन-विषयाणां प्रवेशपरीक्षा आयोजयिष्यते।

प्रवेशपरीक्षायाः आवेदनपत्रस्य पूरणं, पात्रता तथा अन्याः सूचनाः विश्वविद्यालयस्य अधिकृत-जालपुटे उपलभ्याः सन्ति। अभ्यर्थिनां कृते प्रवेशपत्राणि शीघ्रमेव निर्गमिष्यन्ते।

# महर्षि महेश योगी वैदिक विश्वविद्यालयेन अक्षय तृतीया महोत्सवः सहस्रशीर्ष पुरुषमण्डलस्य स्थपनादिवसश्च समाचरितः





**हिमसंस्कृतवार्ता - डॉ.आलोकः - कटनी, मध्यप्रदेशः।** महर्षि महेशयोगी वैदिकविश्वविद्यालये, ब्रह्मस्थाने-करौन्दी,कटनी(मध्यप्रदेशे), दिनाङ्के २० एप्रिल् २०२६, सोमवासरे अपराह्णे ३:०० वादनतः वेदविभागे अक्षयतृतीया तथा श्रीपरशुरामजयन्ती इत्यनयोः पावनावसरे महर्षिसङ्गठनेन स्थापितस्य सहस्रशीर्ष पुरुषमण्डलस्य स्थापनादिवसः श्रद्धया उत्साहेन च सम्यक् आचरितः।अस्मिन् शुभावसरे वैदिकपरम्परानुसारं सहस्रशीर्षविष्णुभगवतः, परशुरामस्य तथा वैदिकगुरुपूजनस्य आयोजनं वैदिकपण्डितेन श्रीविरिञ्चिनारायणमहोदयेन विधिवत् सम्पन्नम्।कार्यक्रमस्य अन्तर्गतं पुरुषसूक्तम् तथा *विष्णुसहस्रनामस्तोत्रम् इत्यनयोः सामूहिकपाठः अपि कृतः, येन सम्पूर्णं वातावरणं भक्तिमयम् आध्यात्मिकोर्जया च परिपूर्णम् अभवत्।अस्मिन् कार्यक्रमे महर्षिपरिवारस्य माननीयाः शैक्षणिकाशैक्षणिककर्मचारिणः तथा प्रायः चत्वारिंशत् अधिकाः वैदिकछात्राः उपस्थिताः आसन्।कार्यक्रमस्य मार्गदर्शनं प्रो॰ मानवेन्द्र-पाण्डेयमहोदयेन तथा डॉ॰ के.के.त्रिपाठीमहोदयेन च कृतम्। कार्यक्रमस्य संयोजकः वेदविभागाध्यक्षः डॉ॰ आलोकचन्द्रपरिडामहोदयः सहसंयोजकः श्रीसत्यनारायणशुक्लमहोदयः च आस्ताम्। कार्यक्रमस्य सफलसञ्चालनं समापनं च सर्वेषां सहयोगेन सम्पन्नम् इति शम्।

# सुक्खु-सर्वकारस्य निर्गमनस्य घोषः जातः, मिथ्याभाषणेन देशं भ्रामयति मुख्यमन्त्री - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - सिरमौरः।** पूर्वमुख्यमन्त्री तथा विपक्षनेता जयरामठाकुरः स्वकीय-सिरमौर-प्रवासकाले प्रदेशस्य काङ्ग्रेस-सर्वकारस्य मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु-महोदयस्य च उपरि तीक्ष्णप्रहारं कुर्वन् राज्यस्य वर्तमान-राजनैतिक-आर्थिकस्थितिं अतीव चिन्ताजनकीं उक्तवान्। सराहां-पांवटा साहिब क्षेत्रयोः आयोजित-विविधकार्यक्रमेषु कार्यकर्तॄन् जनतां च सम्बोधयन् जयरामठाकुरः अवदत् यत् प्रदेशे सुक्खु-सर्वकारस्य निर्गमनस्य घोषः जातः अस्ति, यतोहि एषः तादृशः प्रथमः सर्वकारः अस्ति यः जनहितकार्याणि कर्तुं स्थाने पूर्वतनसर्वकारेण विवृत्तानां संस्थानां पिधानं करोति।तेन मुख्यमन्त्रिणः उपरि 'असत्य-राजनीतिं' कर्तुम् आरोपं कुर्वन् कथितं यत् सुक्खु-महोदयः विधानसभायाः अन्तः बहिश्च तु मिथ्या वदति स्म, किन्तु अधुना सः प्रदेशस्य सीमाः उल्लङ्घ्य सम्पूर्णदेशस्य पुरतः असत्यं प्रस्तुतवान्। पश्चिमबङ्गाल-प्रवासकाले मुख्यमन्त्रिणा सर्वाः 'दश-प्रत्याभूतयः' (गारण्टी) पूरिताः इति कृतस्य विश्वासस्य प्रत्युत्तरं ददत् ठाकुरः अवदत् यत् धरातलीयं सत्यं अस्मात् सर्वथा विपरीतं वर्तते, अद्यावधि एकापि प्रतिज्ञा न पूरिता। काङ्ग्रेसपक्षः केवलं निर्वाचनं जेतुं मिथ्यायाः आश्रयं स्वीकरोति।

जयरामठाकुरः प्रदेशस्य दयनीयायाः आर्थिकस्थितेः कृते मुख्यमन्त्रिणः वित्तीय-कुप्रबन्धनं साक्षात् उत्तरदायी मत्वा अवदत् यत् सर्वकारः स्वविफलताः गोपयितुं वा अस्मान् निन्दति वा प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपरि दोषारोपणं करोति। सः अवदत् यत् यदा मुख्यमन्त्री सी.पी.एस. (CPS) इत्येतेषां सेनां निर्माय स्वप्रियेभ्यः च 'कैबिनेट' पदं वितीर्य राजकीयकोषं लुण्ठति स्म, तदा तस्मै राज्यस्य आर्थिकदशायाः स्मरणं नागतम्। अद्य स्थितिः एतादृशी अस्ति यत् कर्मचारिणां वेतनं, पेन्शनं, वृत्तिं च समये न लभ्यते, यत् प्रदेशे 'वित्तीय-आपातकालस्य' सङ्केतः अस्ति। तेन कटाक्षं कुर्वन् उक्तं यत् मुख्यमन्त्रिणः 'संस्था-पिधान-व्यसनात्' अधुना काङ्ग्रेस-विधायकाः अपि भीताः सन्ति, ते च मुख्यमन्त्रिणं स्वक्षेत्रेषु आह्वयितुं सङ्कोचं कुर्वन्ति येन तेषां क्षेत्राणां संस्थाः पिहिताः न भवेयुः।कानूनव्यवस्थां प्रशासनिककार्यप्रणालीं च अधिकृत्य ठाकुरः अवदत् यत् राज्ये आरक्षकमहानिदेशकः (DGP) स्वकीयं अहङ्कारं शान्तं कर्तुं अस्य विषयस्य अन्वेषणं करोति यत् कनिष्ठः अधिकारी वरिष्ठं किमर्थं गृहं पर्यन्तं वाहनेन त्यक्तवान्। अपरपक्षे सर्वकारः 'समोसक-अन्वेषणे' आरक्षकदलस्य ऊर्जां नाशयति यत् मुख्यमन्त्रिणः समोसकं केन खादितम्, यदा तु मुख्यसचिवस्य उपरि भ्रष्टाचारस्य आरोपाः सन्ति। तेन सन्देहः प्रकटितः यत् सम्भवतः 'अधिकारिवर्गस्य' (ब्यूरोक्रेसी') समीपे मुख्यमन्त्रिणः किमपि रहस्यं (पोल) वर्तते, येन कारणेन मुख्यमन्त्री कार्यविधिं कर्तुं विवशः दृश्यते।

स्थानीय-भाजपानेतृभिः सह संवादं कुर्वन् सः जनसमस्याः श्रुतवान् पक्षं च कृतवान् यत् प्रदेशस्य जनता एतं जनविरोधि-सर्वकारं समूलमुत्पाटयितुं मनः कृतवती अस्ति, आगामी-निर्वाचने च काङ्ग्रेसस्य ऐतिहासिकी पराजयः निश्चिता अस्ति। अस्मिन् प्रवासे तेन पांवटा साहिब मध्ये 'हैप्पी स्क्वायर रेस्टोरेण्ट' इत्यस्य उद्घाटनं कृतं तथा च 'पैरालम्पिक्स्' मध्ये पदकं जित्वा देशस्य गौरवं वर्धितवत्यौ हिमाचलस्य विभूत्यौ, सविता-अनिलौ सम्मानितौ कृत्वा तयोः उज्ज्वलविषयस्य कामना कृता। अस्मिन् अवसरे पच्छाद-विधायिका रीना कश्यप, सांसदः सुरेश कश्यपः, भाजपानेता बलदेव तोमरः इत्यादयः गण्याः उपस्थिताः आसन्।

## वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। एका रुचिपूर्णा वार्ता मया पठिता। एकया महिलया स्वकीया गुरुग्राम-नगरस्य वृत्तिः त्यक्ता अस्ति। तया इदानीं देहरादूननगरे निवासः कृतः। सा वदति यत् तत्र जीवनस्य गतिः मन्दा सुखदा च अस्ति।

नन्दिनी- सत्यम्, महानगरेषु कोलाहलः अधिकः भवति। परन्तु पश्य, अमेरिकादेशे एका विचित्रा वार्ता दृष्टा। 'एलन-मस्क' महोदयस्य मुखयुक्तः एकः यन्त्र-कुक्कुरः मार्गेषु भ्रमितवान्। एतत् दृष्ट्वा अन्तर्जाल-लोके जनाः द्विधा विभक्ताः सन्ति।


काव्या- तादृशं यन्त्रं भयं जनयति। वाराणस्याम् अपि भूतगृहवत् दृश्यमानायां भोज्यशालायां कश्चन 'छाया-परिवेषकः' दृष्टः। तेन एकः बालकः अतीव भीतः जातः। अन्तर्जाले जनाः उक्तवन्तः सन्ति यत् एतादृशः परिहासः उचितः नास्ति।

नन्दिनी- आम्, जनानां भीतिः युक्ता एव। अन्यत् शृणु, एकः शतकोटि-रूप्यकाणां स्वामी उद्यमी त्रिचक्रिकायाम् अटनं कृतवान् अस्ति। सः अल्पमूल्य- विश्रामगृहेषु स्थितवान् अस्ति। सः जीवने अतीव प्रसन्नः दृश्यते।

काव्या- अहो, सरलता एव श्रेष्ठं जीवनम्। धन्यवादः।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# सती-साधनी-दिवसः



✍नयनज्योतिशर्मा। प्राचीनकाररूपदेशे विभिन्नाः लघु- लघु-राजवंशाः राजकार्यं चालयन्ति स्म। तेषु एकः अन्यतमः राजवंशः आसीत् चुतीयाराजवंशः।अस्य वंशस्य एकः प्रतापवान् राजा आसीत् धर्मध्वजपालः। धीरनारायणः तस्य अपरः नाम आसीत्। बहुकालेभ्यः राज्ञः सन्तानः नासीदिति। तस्मात् ताभ्यां भगवतः पुरतः सन्तानकामयन् पूजाम् अकुरुताम्। तेन एका पुत्रीरत्नं प्राप्तवन्तौ। भगवतः साधनया लब्धत्वात् सा **साधनी** इति नाम्ना प्रसिद्धा जाता। साधन्याः अपरनाम *तेजा* इति आसीत्।

यौवनावस्था प्राप्तायां राज्ञः राजकुमार्याः विवाहस्य चिन्ता आगता। परन्तु देशे राजकुमार्याः उपयुक्तः बरः न लब्धः। तेन राजकुमार्याः सयम्वरस्य घोषणाम् अकरोत् राजा। कुमारीं परिनियितुं राज्ञा एकं लक्ष्यं दत्तं यत् यो कोऽपि बृक्षे अरूह्यमानं एकं चिक्रोडं वाणविद्धं कर्तुं शक्नोति तेन सह कुमार्याः विवाहं भविष्यति। परन्तु कार्यमिदं कर्तुं कोऽपि उपयुक्तः तद्वंशीयः राजकुमारः न लब्धः।तदा राज्ञा एकः चतुरः गोपालकः दृष्टः। तं युवकं राजा कुमारीं परिनियितुम् आदिशत्। तदा सः युवकः विस्मितः सन् राजानम् उक्तवान् यत् एकः सामान्यः गोपालकः कथं एकां राजकुमारीं परिनियितुं शक्यते? परन्तु राज्ञा योग्यतां भवति चेत् तद् सम्भवमिति उक्तम्। अनेन प्रकारेण तद् दूर्लभं कार्यम् अतिसारल्येन साधयित्वा सः गोपालकः साधनीं विवाहं कृतवान्।

तस्य युवकस्य नाम नीताइ इति आसीत्। विवाहात् परं तस्य नाम नीतिपालः इति जातः। ईशवीय 1522तमे वर्षे धर्मध्वजपालः तस्य नीतिपालस्य उपरि राजकार्यं समर्पयन् तथा तस्यः लघुकुमारं नीतिपालस्य हस्ते समर्पयन् देशान्तरं प्रति गतवान्। अत्र एकः सामान्यं युवकं चुतीयाराज्यस्य उत्तराधिकारी इति दृष्ट्वा अन्ये राजपरिवाराः त्यस्योपरि षडयन्त्रम् रचयितुं प्रारब्धवन्तः। तेन शनैः शनैः चुतीयाराज्यं दूर्वलम् अभवत्। आहोमराजापि तस्य दौर्वल्यस्य साहाय्यं स्वीकृत्य चुतीयाराज्यस्य उपरि आक्रमनमकरोत्।अनेन अनेकवारं आक्रमणं सहयित्वा नीतिपालः गर्भवतीं राणीं स्वीकृत्य शादियां परित्यज्य चन्दनगिरिपर्यन्तम् आगतवान्। परन्तु तत्रापि चलेन शत्रुपक्षेण नीतिपालम् अहनन्। राणी साधनी अपि स्वकीयविरत्वस्य परिचयं दत्वा रणाङ्गणैव विरगतीं प्राप्तवती। अनेन प्रकारेण साधनी सतीत्वं प्राप्य सती साधनी इति नाम्ना सुविदिता जाता। असमसर्वकारेण ईशवीय 2020 वर्षतः बैशाखमासस्य सप्तमं दिवसं तस्याः स्मृतौ सती-साधनी-दिवसस्य घोषनाम् अकरोत् । तथैव तस्याः नाम्नि एकस्य राज्यिकविश्वविद्यालयस्य प्रतिष्ठाम् अकरोत्।

# उत्तरप्रदेश- संस्कृत- संस्थानस्य आवासीय- दशदिवसीयः पौरोहित्य- प्रशिक्षणकार्यक्रमः सफलतया सम्पूर्णः





**हिमसंस्कृतवार्ताः- लखनऊ**

अयं प्रशिक्षणकार्यक्रमः 10 अप्रैलतः 19 अप्रैल 2026 पर्यन्तं सञ्चालितः, यस्मिन् प्रदेशस्य विभिन्नभागेभ्यः आगताः प्रशिक्षार्थिनः वैदिककर्मकाण्डेषु, शुद्धोच्चारणे, धार्मिकविधिषु च गहनाभ्यासं कृतवन्तः।

समापनसत्रं प्रातः 11 वादने आयोजितम् आसीत्, यस्मिन् संस्थानस्य कार्यकारी अध्यक्षः मनीष चौहानः (प्रमुखसचिवः) निदेशकः प्रमेन्द्र कुमार गुप्तः प्रेरणास्त्रोतसी अभवताम्। कार्यक्रमस्य आरम्भः चेतनशर्मणा संस्थानगीतिका प्रस्तुता। संचालनं लक्ष्मीनारायणोपाध्यायेन कृतम्। करुणेशकुमार-त्रिपाठिना मङ्गलाचरणं कृत्वा वातावरणं आध्यात्मिकतया परिपूर्णम् अभवत्।

अस्मिन् अवसरे डॉ. अनिल मिश्रः प्रास्ताविकवक्तव्येन स्वानुभवान् प्रकाशितवान् यत् वयं षोडशसंस्कारान्, गीतां संध्यां, दुर्गासप्तशतीं, सूक्तानि, गणेशसहस्रनाम च अपठाम। तेन उक्तं यत् पौरोहित्यं केवलं कर्मकाण्डः न, अपितु समाजं सांस्कृतिकमूल्यैः संयोजयितुं महत्त्वपूर्णं साधनम् अस्ति। शिशिरकुमारमिश्रेण वैदिकमन्त्राणां शुद्धोच्चारणस्य आवश्यकता विशेषतः प्रतिपादिता, यत् प्रत्येकस्य धार्मिकस्य अनुष्ठानस्य आत्मा मन्यते।

कार्यक्रमे प्रशिक्षार्थिभिः "धर्मस्य दृष्टिः" तथा "वयं राष्ट्रे जागृयाम" इति संस्कृतनाटके प्रभावशालिन्या शैल्या प्रस्तुते, येन उपस्थिताः सर्वे जनाः अत्यन्तं प्रभाविताः अभवन्। स्वागतभाषणं डॉ. लक्ष्मीनारायणओझा कृतवान्। प्रशिक्षकः अच्युतानन्दत्रिपाठी प्रशिक्षार्थिभ्यः पौरोहित्यस्य जीवनोपयोगितां बोधयन् तत् धर्मपरम्परायाः सामाजिकसमरसतायाः च आधारः इति प्रतिपादितवान्। सर्वेक्षकः महेन्द्रः अध्यक्षीयभाषणेन सह धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य समापनं कौशाम्बीगुरुकुलस्य छात्रैः प्रस्तुतया शान्तिमन्त्रेण अभवत्, येन सम्पूर्णकार्यक्रमः आध्यात्मिकगौरवं प्राप्तवान्। **पौरोहित्यस्य महत्त्वम्-** पौरोहित्यं भारतीयसंस्कृतेः प्राचीनपरम्परा अस्ति, या व्यक्तिं समाजं च धर्मसंस्कारनैतिकमूल्यैः संयोजयति। एतत् केवलं यज्ञपूजनादिषु सीमितं न, अपितु जन्मनः आरभ्य विवाहपर्यन्तं विविधेषु संस्कारेषु मार्गदर्शनं ददाति। अन्ते सर्वेभ्यः प्रशिक्षार्थिभ्यः प्रमाणपत्राणि वितरितानि। अस्मिन् अवसरे डॉ अनिल गौतमः, शिवमगुप्तः इत्येभिः सहिताः अन्ये कर्मचारिणः, अभिभावकाः च उपस्थिताः आसन्।




# "बोधकथा"

अमेरिकायाः भूतपूर्व टेनिसपटु आन्द्रे अगासी महोदयस्य एकः साक्षात्कारः अहं पठितवती। तत्र तेन एका कथा कथिता। जर्मन्याः बोरीस बेकर महोदयेन सह आगासी त्रिवारं पराजितः। बोरीस बेकरस्य प्रारंभस्य भेदनं केवलं अशक्यम्। कथं तं पराजयितव्यम् इति अगासी तस्य विषये दिवारात्रौ चिन्तयन् आसीत्। बेकर महोदयस्य खेलस्य चित्रमुद्रिका प्रतिदिनं अनेकानेक कोणात् पश्यन् आसीत्। प्रतिदिनस्य अभ्यासस्य समये एका चित्रमुद्रिका पश्यन् वेलायां बेकर महोदयस्य एकः स्वभावः आगासी ध्यानं आगतम्। प्रत्येकं प्रारम्भसमये बेकर स्वजिह्वा बहिः निष्कासयति। रञ्जकस्य भाग तु एतत् अस्ति यत्र दिशां 'जिह्वा' गच्छति तत्रैव बेकर कार्यं करोति। आगासी नैका चित्रमुद्रिकां दृष्टवान तथा सः निष्कर्षं कृतवान्। बेकरस्य 'जिह्वा' तस्य मनसि किं प्रचलति तद् दर्शयति इति। तदनन्तरं बेकरस्य कार्यं भेदनम् आगासी कृते सुलभं जातम्। तदनन्तरं नवं द्वन्द्वस्पर्धा आगासी जितः। मित्राणि स्पर्धा कियतापि कठिना, स्पर्धकः उत्तमं क्रीडालवः किन्तु यदि न भीत्वा स्पर्धां कुर्यात तर्हि जयः निश्चितः। ध्यासः, आत्मविश्वासः, अभ्यासः एतत् त्रिसूत्री आवश्यकी। एषः सन्देशः आन्द्रे आगासी महोदयस्य अभ्यासेन वयं ज्ञातः खलु?

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे /महाराष्ट्रम्**

# डॉ. मोहन भागवतः 'प्रणव' इति संस्कृतभारत्याः नूतनकार्यालयस्य उद्घाटनं कृतवान्; अवदत् च - "संस्कृतं सर्वेभ्यः आगन्तव्यम्, एषा संस्कारं प्रदाति"



संस्कृतभाषायाः पुनरुत्थाने वैश्विकप्रसारे च अग्रणीसंस्थायाः **'संस्कृतभारत्याः'** नवनिर्मितस्य केन्द्रीयकार्यालयभवनस्य **'प्रणवस्य'** भव्यम् उद्घाटनं सोमवासरे सम्पन्नम्।

राजधान्याः दीनदयाल उपाध्याय मार्गे स्थितस्य अस्य अत्याधुनिकस्य नवतलमयस्य (nine-story) भवनस्य लोकार्पणं कुर्वन् राष्ट्रियस्वयंसेवकसङ्घस्य सरसंघचालकः **डॉ. मोहन भागवतः** अवदत् यत्— "संस्कृतं सर्वेभ्यः आगन्तव्यम्। एषा भाषा संस्कारान् आनयति।"

## भारतम् एका परम्परा अस्ति : डॉ. भागवतः

तेन उक्तं यत् अक्षयतृतीयायाः दिने ये कार्याणि प्रारभन्ते, तानि अक्षुण्णानि भवन्ति। एषैव वार्ता संस्कृतविषये अपि उक्ता अस्ति। संस्कृतं तादृशम् आभूषणम् अस्ति यस्य कदापि क्षयः न भवति। अस्याः कार्यालयः स्वयमेव एतं सन्देशं ददाति।

तेन प्रतिपादितं यत् कार्यालयस्य उद्घाटने यः आनन्दः उत्साहश्च अस्ति, तस्मिन् कार्यस्य भावः अपि स्थिरः भवेत्। यदि रुच्या सह प्रयोजनम् अपि स्यात्, तर्हि कार्यं सुचारुरूपेण निरन्तरं च भवति। कार्यं साधनैः न अपितु संकल्पशक्त्या आरभ्यते।

पश्चात् कीर्तिः, धनं साधनानि च आगच्छन्ति, परन्तु कार्ये निष्ठा तदा एव भवति यदा प्रयोजनं स्पष्टं स्यात्। संस्कृतं भारतस्य प्राणः अस्ति। भारतस्य अस्तित्वं केवलं भूगोलः नास्ति, अपितु भारतम् एका परम्परा अस्ति। अस्याः आधारेणैव जीवनं प्रचलति। जगतः कृते अस्याः आवश्यकता निरन्तरा वर्तते।

## 'भाषाशिक्षणस्य सरलतमः उपायः संभाषणम्'

डॉ. भागवतः अवदत् यत् भारतं ज्ञातुं, मानितुं तथा च स्वं 'भारतं' कर्तुं संस्कृतं ज्ञातव्यं भविष्यति। भारते विविधाः भाषाः सन्ति, ताः सर्वाः योजयित्री भाषा संस्कृतम् अस्ति। यदि वयं संस्कृतं जानीमः, तर्हि अन्यासां भाषाणाम् अवगमनं सुलभं भवति। पृथिव्याः बिगुडितं सन्तुलनम् यदि पुनः प्राप्तव्यं तर्हि संस्कृतम् आवश्यकम्, परन्तु एषः भावः अन्तःकरणात् आगच्छेत्।

सरसंघचालकः उक्तवान् यत्— "संस्कृतं तादृशी भाषा अस्ति, यां मनसि अवतारणेन भारतं स्वतः एव हृदये अवतरति। तदा एव वयं विविधग्रन्थानां महान्तं तत्त्वज्ञानं ज्ञातुं शक्नुमः। बाल्ये मम संस्कृतशिक्षणे या कठिनाई आसीत्, सा व्याकरणम् आसीत्। अहं व्याकरणं न जानामि, परन्तु भावं जानामि।"

सः स्वसम्बोधने अवदत् यत् भाषाशिक्षणस्य सरलतमः मार्गः **'संभाषणम्'** अस्ति। गतेषु १५ वर्षेषु संस्कृतं प्रति समाजे अनेके सुधाराः अभवन्। अतः अस्माभिः निरन्तरं संभाषणशिबिराणां चिन्तनं करणीयम्। संस्कृतं सर्वैः अवगन्तव्यम्। एषा मनः रञ्जयति, ज्ञानं च वर्धयति। समाजे एतां भाषां नेतारः न्यूनाः सन्ति। यदि एषा विश्वे स्थापनीया अस्ति, तर्हि अद्यापि बहु कार्यं करणीयम् अस्ति।

## 'आङ्ग्लभाषायाः वृद्ध्या बालकाः मातृभाषायां गणनां विस्मृतवन्तः'

डॉ. भागवतः उक्तवान् यत् भारतस्य सर्वासां भाषाणां संयोजिका कडी संस्कृतम् अस्ति। अस्याः भाषायाः सम्यक् प्रचार-प्रसारः करणीयः। संस्कृतभाषा कमपि विनाशयति वा कस्यापि स्थानं न हरति। एषा तु सर्वैः सह प्रचलति। तस्य विपरीतम्, आङ्ग्लभाषायाः वृद्ध्या गृहस्य बालकाः मातृभाषायां गणनां (counting) कर्तुम् अपि विस्मृतवन्तः। संस्कृतं स्वसह संस्कारं भावनां च आनयति।